International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 75-77
© 2026 IJMH
www.themultijournal.com
Received: 21-01-2026
Accepted: 03-02-2026
Publish : 05-02-2026

**Dr. Monojit Mukherjee**
Ph.d from Jawaharlal Nehru-University, New delhi.

# ब्रह्मसूत्रशाङ्करभाष्ये प्रधानकारणवादनिरासः

**Dr. Monojit Mukherjee**

**भूमिका-**

अद्वैतवेदान्तिनां स्वमतमाधारोकृत्य ब्रह्म एकमेव परमतत्त्वञ्च। यद्यपि विविधनामरूपकारणाभ्यां तस्मिन् भ्रमो जायते, तथापि वस्तु एकमेव इति, अज्ञानस्य कारणवशात् जीवः स्वयं ब्रह्मणो विच्छिद्यते। यदा ज्ञानं जायते, तदा आत्मब्रह्मणोः अभेदः भवति, सैव अभेदः मोक्षः इत्युच्यते, अहं ब्रह्मास्मि"।[1] अस्माकं भारतवर्षे केवलं प्रपञ्चस्य विषये चिन्ता नैव क्रियते, अपि तु परलोकविषयकचिन्ता अपि वर्त्तते। सर्वासु विद्यासु अध्यात्मविद्या सर्वोच्चस्थानं लभते। "अध्यात्मविद्या विद्यानां" इत्यनेन श्रीकृष्णवचनेन महत्त्वमिदं प्रतिपाद्यते। इदमात्मज्ञानं षड्दर्शनेषु भिन्नतया प्रतिपाद्यत।

क. न्यायदर्शने आत्मज्ञानं ज्ञानाधाररूपेणाङ्गीक्रियते।
ख. योगदर्शने आत्मा शुद्धः निष्क्रियश्च एवं सुष्ठुतया प्रतिपाद्यते।
ग. पूर्वमीमांसायां चित्तशुद्धेः कृते बहूनि कर्माणि अपेक्ष्यन्ते।
घ तानि आत्मज्ञानस्य कृते साधनानि भवन्ति ।
ङ सवापेक्षया सांख्यदर्शने सुष्ठुरूपेण प्रतिपाद्यन्ते। अस्मिन् दर्शने सृष्टेः मूलमस्ति पारमार्थिक-सत्तावत् पुरुषः प्रकृतिश्च।

सांख्यवादिभिरङ्गीक्रियते मूलप्रकृतिः उत प्रधानमस्य समग्रप्रपञ्चस्य कारणम्, परन्तु अद्वैतिनः निराकुर्वन्ति यद् ब्रह्मैव अस्य जगतः उत्पत्तेः पश्चात् मूलहेतुः। तर्हि स्वाभाविकतया अयं प्रश्नः उदेति, किमेतज्जगत्, किदृक् एतद् इत्यस्य समाधानं दीयते अस्य प्रपञ्चस्य सृष्टिविषये क्वचित् सत्पूर्विका सृष्टिः पठ्यते असद्वा इदमग्रे आसीत् ततो वै सञ्जायते"[2] ।

अधुना शङ्का जायते जगतः उत्पत्तः पश्चात् हेतुः कः? यद्यपि कस्यापि वस्तुनः सृष्टेः पश्चात् कारणं निश्चिततया एवं वर्त्तते। अस्य समाधानमुच्यते प्रधानं अहोस्विद् मूलप्रकृतिः प्रपञ्चस्योत्पत्तिविषये मूलकारणम्, तथा चोक्तं "प्रकृतेराद्योपादानतान्येषां कार्यत्वश्रुते।"[3] पुनः प्रश्नः उत्थापितः अस्ति यद् प्रकृतिवद् पुरुषोऽपि न विकृतिः भवति, अमुष्मिन् सृष्टरूपादानता किमर्थं न स्वीक्रियते तदुपरि सूत्रकारेण कथ्यते यद् "नित्यत्त्वेऽपि आत्मनि योग्यत्वाभावात्"।[4]

अद्वैतवदान्तिनः तु कथयन्ति यद् जगतः प्रधानं कारण प्रधानं तु न अपि तु ब्रह्म एव, श्रुतौ उक्तमस्ति "यतो वा इमानि भूतानि जायन्ते येन जातानि जोवन्ति यद् प्रयन्त्यभिसंविशन्ति तत् विजिज्ञासस्व तद् ब्रह्म इति"[5] ।

एवं रीत्या अनयोः मतभेदप्रसक्तौ किं मतं ज्यायः, किं मतमग्राह्यमिति भवति सन्दहः। तस्मिन् सन्देहे सति केषाञ्चित् सांख्यमतमेव ग्राह्यमिति भ्रमः स्यात। तत्र युक्तोनां वहवीनां सत्त्वात् स्तुतिसहकारस्यापि सत्त्वात् इति कृत्वा तं भ्रममपनोदितं भगवता सूत्रकारेण भागवत्त्यदैः च सूत्रभाष्ययोः द्वितीयाध्याये विचाय सांख्यमते स्तुतिरनुग्रहः स्मृतिस्नुग्रहः वा नास्ति, न वा तत्र युक्तयः सन्ति निर्णीतम्। तं विचारं विचारयितुमेव अयं शोधप्रयासः।

**Correspondence:**
**Dr. Monojit Mukherjee**
Ph.d from Jawaharlal Nehru-University, New delhi.

**विषयः**

**स्मृत्यधिकरणम्**[6] प्रथमाध्याये प्रतिपादितवेदान्तसमन्वयस्य सांख्य-वादिभिः विलक्षणं जायते, तस्य विरोधस्य परिहारः द्वितीया-ध्यायेऽस्मिन् प्रथमसूत्रे क्रियते।

मन्वादिस्मृतयः प्रत्यक्षश्रुतिमूलकाः यतो हि मन्वादिस्मृतिभिः सर्वज्ञेश्वरकारणवादः अभ्युपगतः भगवद्गीतायां य "अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तया"।[7] अतः अयं श्रुत्यर्थाननङ्गीक्रियमाण-सांख्यानां मन्वादिस्मृतिभिः साकं विरोधः अस्ति।

**इतरव्यपदेशाधिकरणम्** [8]

यया युक्त्या कार्यकारणयोः अनन्यत्वं सिद्धयते, तया एव युक्त्या जीवब्रह्मणोः अभेदः अङ्गीकृते सति हितकरणादिदोषः आगच्छति, इथ्थमाक्षेपः सन् इदमधिकरणमारभते।

जीवषु संसारः कल्पितः वास्तविकतया न वर्त्तते, यतो हि "सतासौम्य तदा सम्पन्नः" इत्यादि श्रुतिवाक्यानि जीवेभ्यः पृथक् श्रेष्ठश्च ब्रह्म दर्शयन्ति। अस्यामेव दशायां हितकरणादिदोषाणां स्वयंप्रकाशब्रह्मणि सम्बन्ध एव न विद्यते।

**रचनानुत्पत्यधिकरणम**[9]

ब्रह्मणः यज्जगत्कारणं सर्वज्ञमितिद्वयं श्रूयते तौ धमां प्रधाने किमर्थ न स्वीक्रियते, एतदाक्षेपे सति अधिकरणमिदमारभ्यते। सांख्यदर्शनोक्तानुमानसिद्धप्रमाणं जगत्कारणं न यतो हि स्रष्टव्यज्ञानात् शून्याचेतनप्रधानात् अनेकविविधरचनां नैव भवितुं शक्नोति।

**उपसंहारः**

अयमेव सिद्धान्तो आयाति यत् प्रधानं अव्यक्तम् त्रिगुणात्मकं च। अज्ञानमपि त्रिगुणात्मकं परन्तु अज्ञानस्य आश्रयः ब्रह्म। अस्य प्रपञ्चस्य सष्टेः कृते परमशक्तिसम्पन्नं किमपि अपेक्ष्यते। ब्रह्म अखण्डसच्चिदानन्दनिराकारनिर्गुणानि इति, तदर्थं ब्रह्म परमशक्तिसम्पन्नम् प्रपञ्चस्य जन्मस्थितिलय इति ऐतेभ्य पश्चात् ब्रह्मणः अवदानं वर्त्तते। प्रपञ्चस्य सृष्टिः कल्प्यते तावता ब्रह्म अस्या सृष्टेः पश्चात् मूलकारणं भवति। सांख्यमतानुसारं यथैव चिन्मात्रापरिणाम्यात्मनः भोक्तृत्वं सम्भवति, तथैव श्रुतिप्रमाणेन आत्मनः ईक्षणपूर्वकं कर्तृत्वमपि सम्भवति। बन्धमोक्षादिशस्त्र-कृतसंव्यवहाराय आत्मा नामरूपोपाधिकृतो विशेषः इति अभ्युपगम्यते। परमार्थतः ब्रह्म एकम् अद्वितीयतत्त्वम्। ब्रह्मणि कर्तृत्वभोक्तृत्वादयः किमपि न सन्ति, यतो हि सर्वे भावाः अद्वैतरूपाः । अद्वैतवेदान्तमतानुसारं ब्रह्म जगतः सृष्टेः पश्चाद् मूलकारणम् इति सिद्धयते।

**संक्षिप्ताक्षरसूची**

तै. उप - तेत्तिरीयोपनिषद्

बृ. उप - बृहदारण्यकोपनिषद्

-ब्र. सू. शा. भा - ब्रह्मसूत्रशाङ्करभाष्यम्

सा. सू - सांख्यसूत्रम्

**ग्रन्थसूची**


- अद्वैतसिद्धिः मधुसूदनसरस्वतीकृता. चोखम्बासंस्कृतसीरीज, वाराणसी, 2011
- ईशादि नौ उपनिषद् गीता प्रेस गोरखपुरः 2012
- ब्रह्मसूत्रम् स्वामी शिवानन्दः मोतिलाल वणारसी दास, नवदेहली, 2003
- ब्रह्मसूत्रशाङ्करभाष्यद्वितीयाध्यायः वाचस्पतिमिश्रकृतः मोति-लाल वणारसी दास, नवदेहली, 2009
- ब्रह्मसूत्रशाङ्करभाष्यरत्नप्रभाटीका. गोविन्दानन्दकृतः भारतीय बुक कर्पोरेशन, नवदेहली, 2010
- ललिताव्याख्योपेतन्यायमालाशाङ्करभाष्यसम्बलितसूत्रम्.कैलाशपीठदर्शाचार्यमहामण्डलेश्वरानन्तश्रीविभूषितस्वामीविद्यानन्द गिरिराजः कैलाशविद्या प्रकाशनम्, 2001
- श्रीमद्भगवद्गीताशाङ्करभाष्यम्. शङ्कराचार्यकृतम्, गीताप्रेस, गोरखपुर, 2002
- सांख्यकारिका. ईश्वरकृष्णकृता. भारतीयविद्याप्रकाशनम्, नव-देहली, 2007
- सांख्यसूत्रम्, कपिलमुनिकृतम्, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, 2008
- सांख्यप्रवचनभाष्यम्. श्रीविज्ञानभिक्षुकृतम् चौखम्बासंस्कृत-संस्थानम्, वाराणसी, 2009
- सिद्धान्तलेशसंग्रहः अप्पयदीक्षितकृतः चाखम्बासंस्कृतसंस्थानम्, वाराणसी, 1937


**आंग्लोग्रन्थाः**


Brahmasutraanubhasya by Vallabhacharya, visva dharma sansthan, Ahmedabad, 1980

Brahmasutraanuvruti by Jaynendra Saraswati. Sankracharya vidyapitham, Varanasi, 1987

Brahmasutra Bhasya vol.1 Kauthacharya, 1918

Brahmasutrabhasya Vol.2 Kauthacharya, 1980

Brahmsutra by Vyasdeva Bhartiya Vidya Prakashan, Delhi, 1998

Brahmasutrasankarabhasya Bhamati commentary by Bachaspati Mishra. Sanskrit Pustak Bhandar, Kolkata 1973

Brahmasutrasankarabhasyam. Parimal prakashan, Delhi, 1981

Purusha Sudhanidhi (Brahmasutravritti) Shrinivasan Ramamani S.N. Nag Prakashan, Delhi, 1998

The Brahmasutra and their principal commentary by V.M Apte Munshiram Manoharlal, pvt. Ltd, 2001

Upanishads by F. Max. Muellar. Prakash Books India Pvt. Ltd. 2001

Vedantaparibhasha by Dharmaraja Adhvarindra Choukhamba Sanskrit series, Varanasi, 1990

**कोशग्रन्थाः**

अमरकोशः अमरसिंहकृतः निर्णय सागर प्रेस बम्बई, 1961

भारतीयदर्शन बृहत्कोश वच्चुलाल अवस्थी. शारदा पाब्लिसिंग हाउस, 2004

वाचस्पत्यम्. चौखम्बासंस्कृतग्रन्थमाला, वाराणसी, 1968

Encyclopaedia of Indian philosophy by Karl H. Potter, Motilal Banarasi Das, Delhi, 1970 English-Sanskrit dictionary by Monier William. Munshiram Manoharlal Das, Delhi, 1976.

**E Sources-**

www.google.com
www.indiacat.in
www.jnu.ac.in
www.worldcat.in

**पाद टिप्पणी**

[1] बृ. उप. १/४/१०

[2] तै. उप. २/७

[3] सां सू ६/३२

[4] सां. सू. ६/३३

[5] तै. उप. ३/२

[6] ब्र. सू.  २/१/१

[7] ब्र. सू. २/१/७

[8] ब्र. सू. २/१/७

[9] ब्र. सू. २/२/१/१